শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমন্নিগমান্তমহাদেশিকৈঃ অনুগৃহীতম্

# ॥ শ্রী ষোডশাযুধস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী ষোডশাযুধস্তোত্রম্ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

স্বসঙ্কল্পকলাকল্পৈরাযুধৈরাযুধেশ্ৱরঃ।
জুষ্টঃ ষোডশভির্দিৱ্যৈর্জুষতাং ৱঃ পরঃ পুমান্॥ 1 ॥

যদাযত্তং জগচ্চক্রং কালচক্রং চ শাশ্ৱতম্।
পাতু ৱস্তৎ পরং চক্রং চক্ররূপস্য চক্রিণঃ॥ 2 ॥

যৎপ্রসূতিশতৈরাসন্ রুদ্রাঃ পরশুলাঞ্ছনাঃ।
স দিৱ্যো হেতিরাজস্য পরশুঃ পরিপাতু ৱঃ॥ 3 ॥

হেলযা হেতিরাজেন যস্মিন্ দৈত্যাঃ সমুদ্ধৃতে।
শকুন্তা ইৱ ধাৱন্তি স কুন্তঃ পালযেত ৱঃ॥ 4 ॥

দৈত্যদানৱমুখ্যানাং দণ্ড্যানাং যেন দণ্ডনম্।
হেতিদণ্ডেশদণ্ডোঽসৌ ভৱতাং দণ্ডযেদ্দ্ৱিষঃ॥ 5 ॥

অনন্যান্ৱযভক্তানাং রুন্ধন্নাশামতঙ্গজান্।
অনঙ্কুশৱিহারো ৱঃ পাতু হেতীশ্ৱরাঙ্কুশঃ॥ 6 ॥

সম্ভূয শলভাযন্তে যত্র পাপানি দেহিনাম্।
স পাতু শতৱক্ত্রাগ্নির্হেতির্হেতীশ্ৱরস্য ৱঃ॥ 7 ॥

অৱিদ্যাং স্ৱপ্রকাশেন ৱিদ্যারূপশ্ছিনত্তি যঃ।
স সুদর্শননিস্ত্রিংশস্সৌতু ৱস্তত্ত্ৱদর্শনম্॥ 8 ॥

ক্রিযাশক্তিগুণো ৱিষ্ণোর্যো ভৱত্যতিশক্তিমান্।
অকুণ্ঠশক্তিঃ সা শক্তিরশক্তিং ৱারযেত ৱঃ॥ **9**॥

তারৎৱং যস্য সংস্থানে শব্দে চ পরিদৃশ্যতে।
প্রভোঃ প্রহরণেন্দ্রস্য পাঞ্চজন্যঃ স পাতু ৱঃ॥ **10**॥

যং সাত্ত্বিকমহঙ্কারম্ আমনন্ত্যক্ষসাযকম্।
অৱ্যাদ্ৱশ্চক্ররূপস্য তদ্ধনুঃ শার্ঙ্গধন্ৱনঃ॥ **11**॥

আযুধেন্দ্রেণ যেনৈৱ ৱিশ্ৱসর্গো ৱিরচ্যতে।
স ৱঃ সৌদর্শনঃ কুর্যাৎ পাশঃ পাশৱিমোচনম্॥ **12**॥

ৱিহারো যেন দেৱস্য ৱিশ্ৱক্ষেত্রকৃষীৱলঃ।
ৱ্যজ্যতে তেন সীরেণ নাসীরৱিজযোঽস্তু ৱঃ॥ **13**॥

আযুধানামহং ৱজ্রং ইত্যগীযত যঃ স ৱঃ।
অৱ্যাদ্ধেতীশৱজ্রোঽসৌ অদধীচ্যস্থিসম্ভৱঃ॥ **14**॥

ৱিশ্ৱসংহৃতিশক্তির্যা ৱিশ্রুতা বুদ্ধিরূপিণী।
সা ৱঃ সৌদর্শনী ভূযাৎ গদপ্রশমনী গদা॥ **15**॥

যাত্যতিক্ষোদশালিৎৱং মুসলো যেন তেন ৱঃ।
হেতীশমুসলেনাশু ভিদ্যতাং মোহমৌসলম্॥ **16**॥

শূলিদৃষ্টমনোর্ৱাচ্যো যেন শূলযতি দ্বিষঃ।
ভৱতাং তেন ভৱতাৎ ত্রিশূলেন ৱিশূলতা॥ **17**॥

অস্ত্রগ্রামস্য কৃৎস্নস্য
প্রসূতিং যং প্রচক্ষতে।
সোঽৱ্যাৎ সুদর্শনো ৱিশ্ৱং
আযুধৈঃ ষোডশাযুধঃ॥ **18**॥

শ্রীমদ্বেঙ্কটনাথেন শ্রেযসে ভূযসে সতাম্।
কৃতেযমাযুধেন্দ্রস্য ষোডশাযুধসংস্তুতিঃ ॥ **19** ॥

॥ ইতি শ্রী ষোডশাযুধস্তোত্রং সমাপ্তম্ ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ ॥